National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2021; 1(35): 211-213
© **2021 NJHSR**
www.sanskritarticle.com

डॉ.युद्धिष्ठिरसाहु:
संस्कृतविभागाध्यक्षः,
रेभेन्साविश्वविद्यालयः,
कटक, ओडिशा

Correspondence:
डॉ.युद्धिष्ठिरसाहु:
संस्कृतविभागाध्यक्षः,
रेभेन्साविश्वविद्यालयः,
कटक, ओडिशा

निपात एकाजनाङ्सूत्रविमर्श:

डॉ.युद्धिष्ठिरसाहु:

निपातानां विषये संस्कृतभाषाऽर्णवस्य मन्थनाद्, बहूनि सिद्धान्तरत्नाति निःसरन्ति। बहुत्र संस्कृतवाङ्मये सिद्धान्तोऽयं सिद्धान्तितो वर्त्तते । महाभाष्यकारेण उपसर्गाविभक्तिस्वरप्रतिरूपकारच निपाता भवन्ति इति।[1] अयमाशय: - उपसर्गप्रतिरूपकाः विभक्तिप्रतिरूपकाः स्वरप्रतिरूपकाश्च निपाता भवन्ति ।

• उपसर्गप्रतिरूपकाः निपाताः यथा - अवस्तात्, परस्तात्, परितः, अभितः इत्यादीनि । एतेषां प्रकृतय उपसर्गा एव, ते च प्रत्ययवन्तः सञ्जाताः।

विभक्तिप्रतिरूपका निपाताः गैवाण्यामालोकपदवीमवतरन्ति भूयांसो विभक्तिप्रतिरूपकाः निपाताः ते च यथा- अत्र, अधुना, अन्तरतः, अन्येद्युः, यत्र-तत्र, शुभम्-भद्रम् ।

• स्वरप्रतिरूपका निपाता: - स्वरप्रतिरूपका अपि निपाता उपयुज्यन्ते संस्कृतभाषायाम्। यथा - इ इन्द्रं पश्य, ई ईद्दृशः संसारः, उ उत्तिष्ठ, ऊ ऊषरे बीजं वपसि ।

महामुनिपाणिनिदृष्ट्या निपाताश्चतुविधा: सन्ति। यथा - विशुद्धा निपाताः,गत्युपसर्गसंज्ञाविशिष्टा निपाताः, गतिसंज्ञामिश्रिता निपाताः, कर्मप्रवचनीयसंज्ञायुक्ता निपाताः।

• विशुद्धा निपाताः-चादयोऽसत्वे[2], प्रादयः[3] इत्याभ्यां सूत्राभ्यां निर्दिष्टाः सन्ति ।तथा हि – असत्वे अर्थे चादयो निपातसंज्ञाः स्युः इति सूत्रार्थे किमिदमसत्वमिति जिज्ञासायामुक्तम्-सीदन्ति-तिष्ठन्ति जातिगुणक्रिया यस्मिस्तत्सत्वं द्रव्यम्[4], न तु सतो भाव: सत्वमिति, तदा तु-साध्यमानतया क्रियारूपापन्ना सत्ता इत्यर्थः स्यात्। तथासति असत्वे इति प्रतिषेधोऽनर्थक: स्यात्, चादिषु सत्तावाचिनः शब्दस्याप्रसिद्धया, व्यावर्त्यालाभात् ।

• गत्युपसर्गसंज्ञावशिष्टाः निपाताः संकीर्तिताः सन्ति । उपसर्गाः क्रियायोगे गतिश्च इत्याभ्यां सूत्राभ्याम्। तथा हि - क्रियया सहयोगे सति निपातसंज्ञापूर्वकमेतत्संज्ञाद्वयमाभ्यां विधीयते, क्रियया सह योगे द्योत्यद्योतकभावो वाच्यवाचकभावो वा। संज्ञात्रितय समावेशस्य फलं तु प्रति प्रणयति इत्यत्र 'प्र' इत्यस्योपसर्गत्त्वात् नयतेर्नकारस्य णत्वम् गतित्वात् गतिर्गतौ[5] इति प्रतीत्यस्य निघातः निपातत्वादुदात्तः स्वरश्च सिध्यति । ईदृशनिपातानां द्योतकतापक्षे वाचकतापक्षो वाभ्युपेयते।

• गतिसंशमिश्रिता निपाता: 'ऊर्यादिच्विड़ाचश्च'[6] इत्यादि सूत्रैनिरूपिता:। ऊर्यादयः प्राग् निपाताः सन्तः क्रियायोगे गतिसंज्ञका भवन्ति, ऊरी, उररी इमौ स्वीकारवाचकौ। एवं भूषणेऽर्थे शक्तोऽलमिति निपातः क्रियायोगे गतिसंज्ञको भवति। एवमेव आदरामादरयोः सदसच्छब्दौ[7], अपरिग्रहेऽन्तरशब्द:[8], श्रद्धातिशये कणे मनसि[9] इतोमौ शब्दौ, व्यर्थे साक्षात् प्रभृतयः क्रियायोगं प्राप्य गतिसंज्ञा लभ्यन्ते। तत्फलस्तु कुगतिप्रादयः इति नित्यसमासः।

- कर्मप्रवचनीयसंज्ञायुक्ता निपाताः संकेतिताः सन्ति अनुर्लक्षणे[10] प्रभृतिसूत्रैः कर्मक्रियां प्रोक्तवन्त इति कर्मप्रवचनीयाः, अर्थात् क्रियामुक्तत्वेदानीं क्रियानिरूपितसम्बन्धं द्योतयन्तीति। यथा अनुर्लक्षण इति सूत्रेण निपातसंज्ञा कर्मप्रवचनीयसंज्ञा विधीयते। लक्ष्य-लक्षणभावे सम्बन्धे द्योत्ये सति अत्र कर्मप्रवचनीयसंज्ञाफलं द्वितीयाविभक्ति-सिद्धिः निपातत्वफलन्तु स्वरसिद्धिः।

श्रीमत्पाणिनिप्रणीताष्टाध्यायां निपातसंज्ञाविधायकसूत्राणां अनितर-साधारणं स्थानं महत्वञ्च वरीवर्ति। अन्यथा प्राप्ते अन्यथाकरणं निपातलक्षणम्।

एतन्निपातलक्षणलक्षितसाधुशब्दान्तर्गतनिपातानामपि द्योत्यर्थबोध-कत्वात् तेषामर्थवत्सूत्रेण प्रातिपदिकसंज्ञायाम्, ततस्सुपि, तस्यवि-भक्तिकार्ये च कृते निपातानामपि स्वतन्त्रेण प्रयोगार्हत्वात् वैदिकलौकिकसाधुशब्देषु एकाज्त्वनां निपातानामपि प्रयोगदर्शनात् तेषाम् एकाच्त्वतां निपातानामपि प्रयोगो बोभवतीति। अतएव श्रीकृष्णायजुर्वेदीय तैत्तिरीयसंहितायाम् –

का.उ.ते शमिता कवि: "(सप्तमकाण्डस्य चतुर्थाध्याये) इति मन्त्रस्य साधुत्वान्वाख्यानं सङ्गच्छते। लौकिकोदाहरणेषु अपि एतादृशै-काज्त्वतनिपाताः दृश्यन्ते इत्यभिप्रायेणैव वैयाकरणसिद्धान्तकौमुद्यां प्रकृतिभावप्रकारणे 'आ एवं नु मन्यसे' इति मन्त्रे आकारस्यैकारूपस्य प्रयोगे भट्टोजीदीक्षितेनाकारि। एतत्सर्वं प्रामाणिकं वृत्तं मनसि निधाय निपात एकजनाङ्[11] इति सूत्रार्थतत्वमहमनुसन्दधामि।

तथाहि अत्र सूत्रे निपातपदाभावे 'एकाच्' इत्यस्य प्रगृह्यसंज्ञायां चकार + अत्र इत्यस्य 'अकः सर्वेण दीर्घः'[12] इति सूत्रेण पूर्वापर-योरकारयोः दीर्घादेशः न प्रवर्त्तते। तथाहि कृधातोः लिटि, तिपि, णलि, द्वित्वे अभ्यासकार्ये हलादिशेषे (च + कार् + अ णल्) इति जाते एकस्य अचो अर्थात् णस्थितस्य अकारस्य प्रगृह्यसंज्ञाकरणे 'प्लुतप्रगृह्याअचि नित्यम्'[13] इति प्रकृतिभावे तदनन्तरं विद्यमानः अकारस्य दीर्घादेशः न प्रवर्त्तते। परन्तु सूत्रे निपातपदप्रयोगात् णस्थितस्याकारस्य प्रगृह्यसंज्ञाभावात् चकार + अत्र चकारात्र इत्यत्र दीर्घादेशः प्रवर्त्तते ।

ननु णल् प्रत्ययस्य शास्त्रकल्पितार्थवत्वाद् अर्थवत् ग्रहणपरिभाषया अर्थात् 'वर्णेनापि अनर्थकेन न भवितव्यम्' इति महाभाष्यवचनेन शास्त्रीयोऽर्थः अन्वयव्यतिरेकेण स्वीक्रियते। यस्य सत्वे योऽर्थः प्रतीयते सोऽन्वयः। यस्याभावे योऽर्थो न प्रतीयते स व्यतिरेक इति। अत्र विद्यमानो णलोऽकारस्य शास्त्रीयार्थग्रहणात् अर्थवत्वात् वाचकत्वात् द्योतकत्वाभावात् न प्रगृह्यसंज्ञा। तेन अत्रोदाहरणे निपातसंज्ञायाः अभावात् दीर्घादेशः न प्रवर्त्तते।

'निपात एकाजनाङ्' इति सूत्रे एकाच् इत्यत्र 'एकश्चासौ अच् च' विग्रहवाक्ये कर्मधारयसमासाश्रयणे अवयवार्थे अन्तङ्गत्वनिरूप्यते। एवम् 'एकः अच् यस्य' इति विग्रहवाक्ये बहुव्रीहिसमासाश्रयणे अन्यपदार्थस्य प्राधान्यात् बहिरङ्गत्वं विद्यते। अतः असिद्धं बहिरङ्गमन्तरङ्गे इति परिभाषया अन्तरङ्गत्वात् कर्मधारयसमासेव स्वीकरणीयः ।

तेन वर्तिपदार्थे - समासविग्रहवाक्यघटकपदस्यार्थः प्रधानम्। अतः अत्र 'एकाच्' इत्यत्र कर्मधारयो समासः स्वीकरणीयः ।एवं वि + अहरति + मृगः इत्यत्र एकाच इत्यस्य बहुव्रीहिसमासस्वीकारे 'वि' इत्यत्र 'एकः अच् यस्य' इति बहुव्रीहिसमासदृष्ट्या वि इत्यस्य प्रगृह्यसंज्ञायां व्याहरति मृगः इति प्रयोगस्यानुपपत्तिः जायते। अतः हलादिशेषः इति सूत्रारम्भसामर्थ्यात् 'एकाचो द्वे प्रथमस्य' इति सूत्रे 'एकाच्' इति पदे 'निपात एकाजनाङ्' इति सूत्रेण 'प्र' इत्यस्य प्रगृह्यसंज्ञा न प्रवर्त्तते तत्र कर्मधारयसमासात्। अतः कौमुद्यामुक्तम् - एकोऽच् निपात आङ्वर्जे' इति। 'अनाङ्' इत्यत्र पर्युदासनञ् विद्यते । यद्यत्र प्रसज्यप्रतिषेधो नञ् स्वीक्रियते तर्हि क्रियाध्याहारः, वाक्यभेदः, असमर्थसमासकल्पनादि दोषत्रयेण गौरवं जायते। एतदर्थं 'एकाजनाङ' इति सूतं नैव लिखितम्। न चैत् न आङ = नाङ् इति नैव सूत्रितम्।

पर्युदासनञ् स्वीकारे अकार: वासुदेवः स्यात्। वासुदेववाचक अशब्दस्य पञ्चम्यन्ते आत् इति जाते तस्य अभिविध्यर्थे 'आङ्मर्यादाभिविध्योः'[14] इति सूत्रेण आङा सह अव्ययीभावसमासे विभक्तिलोपे 'आ अ' इति सवर्णदीर्घे 'आत' इति जाते अव्ययीभावश्च[15] इति अव्ययीभावसमासस्य नपुंसकलिङ्ग 'ह्रस्वो नपुंसके प्रातिपदि-कस्य'[16] इति सूत्रेण ह्रस्वे' अ'इति जाते सु आगमे नाव्ययीभावा-दतोऽम्पञ्चम्याः[17] इति सूत्रेण अमादेशे 'अ अम्' इति जाते 'पूर्वान्तवत्भावेन निपातत्वेन प्रगृह्यसंज्ञायाम् 'अमि पूर्वः' इति सूत्रेण पूर्वरूपाभावे 'अम्' इति स्वस्य निष्पत्तिर्नजायते। शेखरकारेणोक्तम् यदि 'अम्' इति प्रयोगः सत्याभिधानं ननाम प्रामाणिकम् तर्हि तथैव पूर्वान्तवत्भावेन निपातत्वं स्वीक्रियते। तथैव आङ्त्वस्य अतिदेशेन पूर्वान्तवद्भावं भवितुमर्हति। अतः अतिदेश्यमान धर्मः आङ्त्वं, तद्विरुद्धः स्वाश्रयधर्मः आङ्त्वं, तद्विरुद्धः स्वाश्रयधर्मः स्वतःसिद्ध आभिन्नत्वं, तत्प्रयुक्तकार्यं प्रगृह्यसंज्ञा तस्य निवृत्तिः अतिदेशस्य स्वभावासिद्धत्वात्, अत्र प्रगृह्यसंज्ञा न प्रवर्त्तते। एतत् तु स्थानिवत् सूत्रे भाष्ये उक्तम्।

'ओत्'[18] इति सूत्रभाष्यात् प्रतीयते अनाङ् पदे प्रसज्यनञ् विद्यते इति शङ्का उत्पद्यते । यतः ओ आयातं मरुत: इति वाक्ये आ + उ इत्यस्य मेलने 'ओ' इति उत्पद्यते । तत्र पूर्वान्तवद्भावेन आङ्त्वस्य अतिदेशे जाते अनाङ् इत्यनेन प्रगृह्यसंज्ञा निषिध्यते। तदा भाष्यकार:'ओत्' सूत्रस्य उद्देश्यंप्रतिपादनार्थं 'अनाङ् इति

प्रतिषिद्धार्थोऽयमारम्भ:' इति प्रतिपादितम्। अर्थात् अनाङ इत्यत्र प्रगृह्यसंज्ञा अप्राप्तिस्थले 'ओत्' इति सूत्रारम्भः। नागेशानुसारेण तु 'आ ओ इति प्रतिषिद्धार्थो-ऽयमारम्भः इति भाष्यकार वचनं तु प्रसज्यप्रतिषेधनञ्पक्षे न भवति। अपि तु 'अनाङ्' इत्यत्र पर्युदासनञ् विद्यते। एवं यद्यपि पर्युदासपक्षे प्रतिषेधः न भवति। तथापि गत्यागत्य नियमेन आभिन्नत्वस्य प्रगृह्यस्य प्रतिषेधे 'आङ्' इत्यस्य प्रगृह्यसंज्ञा निषिध्यते तदेव गम्यप्रतिषेध-माधारिकृत्य भाष्यकारस्य आ उ ओ प्रतिसिद्धार्थोऽयमारम्भ:' इति वचनम् आरब्धम्। अतः पर्युदासस्य अनुपपत्तिः इति न च वाच्यम्। अनाङ् इत्यत्र पर्युदास नञ् स्वीकारादेव आभिन्न आङ्सदशस्यै ग्रहणम्। तेन आङ्सदृशस्य निपातत्वेन एकात्वेन च लब्धः। अतः स पुनः सूत्रे निपात एकाच्ग्रहणं स्पष्टप्रतिपत्यर्थम्। सूत्रे एकग्रहणस्य फलं तु - यथैव स्वाङ्गसमुदाये स्वाङ्गत्वस्याभावं, अच्समुदाये अच्त्वस्याऽभावः। तथैव अत्रापि 'अच्' इत्यस्य प्रगृह्यसंज्ञाप्राप्ते अच्समुदायस्य प्रगृह्यसंज्ञाऽभावे सूत्रे एकग्रहणमनावश्यकमिति चेन्न। शेखरकाराणां मते 'वर्णग्रहणे जातिग्रहणम्' इति परिभाषया यत्र एकस्य शब्दस्य स्थाने एकः अच्वर्णस्य ग्रहणं भवति। तत्र अच्त्वावच्छिन्नानाम् अष्टादशभेदानां ग्रहणं भवति। अतः अच् समुदायरूपि यः अच्, तस्य प्रगृह्यसंज्ञा वारणार्थं सूत्रे एकग्रहणम् आवश्यकम्। 'वर्णग्रहणे जातिग्रहणमिति'घि परिभाषास्वीकारादेव 'धिप्स्यति' इति प्रयोगस्य सिद्धिः जायते। तथाहि- दम्भ्धातोः इच्छार्थे सन्प्रत्यये 'सनीवन्तर्धभ्रस्जदम्भुं श्रिस्वृयूर्णुभरज्ञपिसनाम्" इति सूत्रेण विकल्पेन इडागमे 'दम्भ इच्च' इति सूत्रेण इत्वे, द्वित्वे 'अत्र लोपोऽभ्यासस्य[19] इति सूत्रेण अभ्यासस्य लोपे दिम्भ् + स् + ति इति स्थिते 'हलन्ताच्च' इति सूत्रेण 'सन्' इत्यस्य कित्वं प्रवर्त्तते। वस्तुतं अत्र जात्यवच्छिन्न ग्रहणाभावे कित्वं न प्रवर्त्तते। तथाहि सन् प्रत्ययस्य समीपे इक: अविद्यमानत्वेऽपि एकग्रहणेन ज्ञापितम् - वर्णग्रहणे जातिग्रहणमिति। तेन दि + दम्भ् + स् + ति' इति स्थिते इक् समीपे हल् इत्युक्ते हल्त्वावच्छिन्न मकारभकारयोः ग्रहणं भवति। अतः इकारसमीपे सन्विद्यमात्वात् कित्वात् न लोपे, भष्भावे, चर्व्वे घिप्सति' इति रूपं सिद्ध्यति इति भाष्ये स्पष्टम्। एकग्रहणं 'वर्णग्रहणे जातिग्रहणार्धम्' इत्यत्र जातिग्रहणे किमपि कार्यं न प्रवर्त्तते। अतः कथं जातिग्रहणमिति चेत् - उपात्तजात्याश्रय एकस्य अथवा अनेकव्यक्ति ग्रहणार्थम्। तेन तितउ शब्दैकदेशस्य 'अ उ' इत्यस्यानुकरणे 'अ उ अकोरत्' इत्यवस्थायाम् 'अनुकरणं चानिति परम्' इति सूत्रेण 'अ उ' इत्यस्य निपातसंज्ञाप्राप्तेऽपि एकवर्णाभावात् प्रगृह्यं न प्रवर्त्तते। तदेव एकग्रहणस्य फलम्।

'आ' इति निपातस्य पक्षद्वयं वर्त्तते। आ अङ् चेति तत्र कुत्र ङित् भवति कुत्र अङित्भवति इति प्रातिपादनार्थं 'वाक्यस्मरणयोरङित्' इति दीक्षितेनोक्तम्। अर्थात् वाक्य एवं स्मरणे यः आकार: स: ' अङित्' यथा 'आ एवं नु मन्यसे' अर्थात् 'पूर्वमेवं नामंस्थाः, सम्प्रत्ति एवं मन्यसे" 'इत्यत्र आ इत्यस्य ङित्भिन्नार्थत्वात् प्रगृह्यसंज्ञायां प्रकृतिभावःजायते।

अत: उक्तम् –

ईषदर्थे क्रियायोगे मर्यादाऽभिविधौ च यः।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्।।

अन्यत्र ङित् इति विवेक:। वाक्यशब्देन स्वार्थगतं नाम वाक्यार्थगतमित्यर्थः अभिमतं स्मरणम् – विस्मृतविषये स्मृतिविषये स्मृतिविषयता भवति स्मरणम्।

पाद टिप्पणी :-

1 महाभाष्यम् (2.2.24)
2 अष्टाध्यायी (1.4.57)
3 अष्टाध्यायी (1.4.58)
4 महाभाष्य-(1.4.57)
5 अष्टाध्यायी-(1.4.62)
6 अष्टाध्यायी-(1.4.61)
7 अष्टाध्यायी-(1.4.63)
8 अष्टाध्यायी-(1.4.65)
9 अष्टाध्यायी-(1.4.66)
10 अष्टाध्यायी-(1.4.59)
11 अष्टाध्यायी-(1.1.14)
12 अष्टाध्यायी-(6.1.102)
13 अष्टाध्यायी-(6.1.124)
14 अष्टाध्यायी-(2.1.13)
15 अष्टाध्यायी-(2.1.41)
16 अष्टाध्यायी-(2.2.47)
17 अष्टाध्यायी-(2.4.83)
18 अष्टाध्यायी-(1.1.25)
19 अष्टाध्यायी-(7.2.49)